| Estd.2005 | Shree Somnath Sanskrit University |
|---|---|
| | (Established by Government of Gujarat (The Gujarat Act no. 25 of 2005)) |
| | Rajendra Bhuvan Road, Veraval-362 266, District-Gir-Somnath. (Gujarat) |
| | Web - sssu.ac.in |
| | Phone : (02876) 244532 Fax : (02876) 244417 |
| | Uni email :sssu.veraval@gmail.com |

**5.3.3.1** Average Number of sport and cultural activities /competitions organized at the institution level per year

| Year | 2015-16 | 2016-17 | 2017-18 | 2018-19 | 2019-20 |
|---|---|---|---|---|---|
| Number of Events | 03 | 06 | 02 | 02 | 01 |

# Cultural Events on Independecnce Day in Campus (15/08/2015)

Every year on 15th August throughout India celebrate the Independence Day of the Country. On this auspicious occasion, Shree Somnath Sanskrit University celebrated the 69th Independence Day on 5th August 2015. Flag hoisting ceremony, Patriotic programmes and Motivational speeches performed by students.



॥ स्वातन्त्र्यपर्व ॥

भारतदेशस्य नवषष्ठितमे (६९) स्वातन्त्र्यपर्वणि श्रीसोमनाथसंस्कृतविश्वविद्यालये ध्वजवन्दनसमारोहः समायोजितः । तत्र विश्वविद्यालयस्य मान्यैः कुलपतिभिः प्रो.अर्कनाथचौधरीमहाभागैः ध्वजवन्दनं कृतम् । तदनतरं तैः उत्साहयुतैः वचोभिः मार्मिकं प्रवचनं प्रदत्तम् । विश्वविद्यालयस्य छात्राः स्वप्रतिभावं प्रकटीकृतवन्तः । छात्राभिः देशभक्तिगीतस्योपरि सुन्दरं नृत्यमपि प्रदर्शितम् । मिष्टान्नवितरणेन सह अयं कार्यक्रमः पूर्णतां प्राप्तः । सम्पूर्णस्य कार्यक्रमस्य सञ्चालनं दर्शनसङ्कायाध्यक्षेन श्रीजानकीशरणमहोदयेन संयोजनं च जयेशमुंगरामहोदयेन कृतम् ।

SOURCE – SOMJYOTI - ISSUE 12, PAGE NO. 05

# Essay Writing Competition on Birth Anniversary of Sardar Vallabh Bhai Patel (30-10-15)

Birth Anniversary of Sardar Vallabh Bhai Patel was celebrated by Shree Somnath Sanskrit University on 30th October2015. Two lectures were delivered on **"Sardar Patel-Pride of the Nation"** byDr.AmritlalBhogayata and Dr. Lalit Patel. Essay Writing Competition was also organizedto motivate the students with the life and philosophy of Sardar Patel.

## सरदारवल्लभभाईपटेलजन्मजयन्ती



३०/१०/२०१५ तमे दिनाङ्के विश्वविद्यालयस्य सभाखण्डे सरदारवल्लभभाईपटेलजन्मोत्सवस्य आयोजनम् अभवत् । कार्यक्रमेऽस्मिन् प्रथमं निबन्धस्पर्धायाः आयोजनमभूत् । अस्यां स्पर्धायां आचार्य- प्रथवर्षीयच्छात्रः राकेशः प्रथमस्थानम् अलभत् । अपराह्णे आयोजिते व्याख्यानसत्रे अनुस्नातकविभागस्य अध्यक्षवर्येण प्रो.देवेन्द्रनाथपाण्डेयमहोदयेन अध्यक्षीयं स्थानम् अलङ्कृतम् । साहित्यविभागे सहायकाचार्यः डॉ.डी.एम्.मोकरीया सर्वान् स्वागतीकृत्य कार्यक्रमस्यास्य सञ्चानलमकरोत् । आयोजितेऽस्मिन् सत्रे मुख्यवक्तारौ डॉ.अमृतलालभोगायता-ललितपटेलौ 'सरदारवल्लभपटेलः राष्ट्रस्य गौरवम्' इति विषयोपरि स्वव्याख्यानम् अकुरुताम् । प्राचार्यनरेन्द्रपण्ड्यामहोदयैः कृतज्ञता प्रकटिता । अस्य सम्पूर्णकार्यक्रमस्य डॉ. डी.एम्.मोकरीया एवं श्रीउमाशंकरझा संयोजनम् अकुरुताम् ।



# Yog Performance on 67th State Level Republic Day Celebration Yoga Day (20-01-2016)

On 20th January 'Yoga Day' programme was celebrated on the occasion of Republic Day in the University Campus. Including School Students and the residents of Veraval, 1800 people participated. As part of this programme, Free Yoga Teaching Classes organized in many places from 16th January to 19th January





## राज्यस्तरीयः प्रजासत्ताकदिवसान्तर्गतः योगकार्यक्रमः



### ६७ तमस्य प्रजासत्ताकदिवसस्य राज्यस्तरीयः कार्यक्रममान्तार्गते विश्वविद्यालयपरिसरे सामूहिकयोगप्रदर्शनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटीवेरावलद्वारा राज्यस्तरीयप्रजासत्ताकदिवसान्तर्गत- 'योगदिवस' इति कार्यक्रमः २०/०१/२०१६ तमे दिनाङ्के समाचरितः । विश्वविद्यालयस्यान्तेवासिनः, वेरावलस्थ-विविधविद्यालयेभ्यः समागताः विद्यार्थिनः, वेरावलस्थाः पौराश्च कार्यक्रमेऽस्मिन् विश्वयोगदिवसं निमित्तीकृत्य सर्वकारयोजनानुसारं नियतयोगासनप्राणायामसूर्यनमस्कारान् कृतवन्तः । गीरसोमनाथजनपदसमाहर्ता डॉ. अजयकुमारः, वेरावलपाटणनगरपालिकाप्रमुखः श्रीजगदीशभाईफोफंडी, अन्येऽधिकारिणश्च कार्यक्रमेऽस्मिन् उपस्थाय भागं गृहीतवन्तः । विशेषरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य विद्यार्थिन्यः अस्मिन् कार्यक्रमे योगप्रदर्शनमकुर्वन् । डॉ. ललितकुमारपटेलः तथा श्रीजयेशमुंगरा मञ्चसञ्चालनं कृतवन्तौ । कार्यकारिकुलसचिवः डॉ. दशरथजादवः कार्यक्रमस्यास्य संयोजनमकरोत् । १८०० जनाः संभूय योगं कृतवन्तः कार्यक्रमेऽस्मिन् ।

अस्यैव कार्यक्रमस्य अङ्गतया वेरावलनगरस्य विविधेषु क्षेत्रेषु निःशुल्कयोगप्रशिक्षणवर्गाः श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १६ तः १९ दिनाङ्कं यावत् आयोजिताः । २६/०१/२०१६ तमे दिनाङ्के ६७ तमस्य प्रजासत्ताकदिवसस्य राज्यस्तरीयः कार्यक्रमः सोमनाथे सम्पन्नः । तत्र विश्वविद्यालयस्य पक्षतः सामूहिकयोगप्रदर्शनं, विश्वविद्यालयचलप्रदर्शनं चाभवत् । तत्र महाऽऽर्तिक्येऽपि विश्वविद्यालस्य अध्यापकाः छात्राश्च भागं गृहीतवन्तः । सामुहिकयोगप्रदर्शने डॉ. जयेशमुंगरामहोदयः संयोजकरूपेण कार्यम् अवहत् ।

विश्वविद्यालयपक्षतः योगदिवस्य आचरतम्

(SOURCE – SOMJYOTI - ISSUE 13, PAGE NO -06)







SOURCE – SOMJYOTI -  ISSUE 13, PAGE NO -16

# Essay Writing Competition on Independence Day in Campus (15/08/2016)

On 15th August 2016 the auspicious occasion of Independence Day was celebrated in Shree Somnath Sanskrit University. The Hon'ble Vice-Chancellor hoisted the Flag. Rangoli Competition, Essay Writing Competition and many Patriotic programmes and Motivational speeches were held.



## स्वतन्त्रता-१९७०-स्मरन्तु तद्बलिदानपक्षपर्व

राष्ट्रध्वजं सम्मानयन् विश्वविद्यालयकुटुम्बः

राज्यसर्वकारस्य पत्रादेशानुसन्धाने श्रीसोमनाथसंस्कृतविश्वविद्यालये पञ्चदशदिनात्मकं स्वतन्त्रतापक्षपर्व समनुष्ठितम् इति हर्षस्य प्रमोदस्य च विषयः । पर्वण्यस्मिन् भारतदेशस्य स्वतन्त्रतायाः सप्ततितमं स्वतन्त्रतापर्वनिमित्तं भारतसर्वकारमानवसंसाधनविकासमन्त्रालयस्य दिनाङ्कः १/९/२०१६ पत्रानुसन्धाने १५-अगस्त २०१६ तमे दिवसे सप्ततितमः स्वन्त्रताप्रवेशः जातः तदनुसन्धाने ''स्वतन्त्रता १९७० स्मरन्तु तद्बलिदानम्'' ( आजादी- १९७०- याद करो कुर्बानी ) स्वतन्त्रतापक्षस्य हर्षोल्लासपूर्वकमायोजनं कर्तव्यमिति सर्वकारेण सङ्कल्पितं तच्चरितार्थं कर्तुं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन छात्रेषु रङ्गवल्लीस्पर्धया, निबन्धलेखनस्पर्धया, सूत्रलेखनस्पर्धया, नगरयात्रया, स्वतन्त्रतादिवसे ध्वजवन्दनेन महापुरुषाणां वचोभिः वृक्षारोपणेन च सुचारुतया विहितमिति आनन्दस्य विषयः ।

अस्य समग्रस्य स्वतन्त्रतापक्षपर्वणः संयोजनं डो. पकंजकुमार रावल-महोदयः, डो. जयेशमुंगरा महोदयः, कुमारीदृष्टिबारैया च सम्भूय कृतवन्तः । ततश्च समग्र-स्वतन्त्रतापक्षपर्वणः छायाचित्रसहितं वृत्तान्तः सर्वकारं प्रति प्रेषितः । अनेन छात्राणामान्तरिकी शक्तिः बहिरागता विकसिता नवपल्लविता च जाता ।




શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી
વેરાવળ
આઝાદી ૭૦-યાદ કરો કુરબાની
(સ્વતંત્રતા પખવાડીયું)
તા. ૦૯/૦૮/૨૦૧૬ થી ૨૩/૦૮/૨૦૧૬



# Celebrating Hindi Day (14-09-2016)

Shree Somnath Sanskrit University celebrated the Hindi Day on 14th September 2016. Students chanted many poems of Hindi Literature. Teachers also explained the importance of Hindi Language in different ways. Students learned the fact that "Along with the knowledge of Regional Languages, knowledge of Hindi Language is also very important".



श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिकभवने
समायोजित: विश्व-हिन्दी- दिवस:

१४/९/२०१६ दिनाङ्के विश्वविद्यालये विश्वहिन्दीदिवस: समायोजित: । कार्यक्रमेऽस्मिन् विद्यार्थिन: नैकेषां प्रसिद्धानां हिन्दीसाहित्यिकानां कृतिं परिचायितवन्त: काव्यपाठं च कृतवन्त:। तस्य विश्वविद्यालयस्य अध्यापका: अपि नैकधा हिन्दीभाषाया: माहात्मयम् अगायन् । कार्यक्रमेऽस्मिन् मुख्यवक्तृत्वम् ऊ ढवान् डो. शत्रुघ्न: पाणिग्राही । स: हिन्दीभाषाया: सरलतां बोधयन् काश्चित् स्वरचिता: पङ्क्ती: अश्रावयत् । कार्यक्रमान्ते आध्यक्ष्यं वहता व्याकरणविदा अनुस्नातकविभागाध्यक्षेण प्रो. विनोदकुमारझा - महाभागेन हिन्दी-भाषाश्रयणेन नैके कलाकारा: नैका: कृतयश्च कथं सर्वजनादरं लेभिरे इति सुष्ठु प्रतिपादितम् । भारतीयै: सर्वा: अपि भारतीयभाषा: समादरणीया:, किन्तु प्रादेशिकभाषाज्ञानेन सममेव भारतीयै: अस्माभि: हिन्दीज्ञानमवश्यमेव सम्पादनीयं, येन भारतस्य प्रत्येकं कोणे अस्माकं सञ्चर: सुकर: भवेत् इति तेन उक्तम् ।



# Cultural Events on 68th Republic Day

# (26-01-2017)

Shree Somnath Sanskrit University celebrated the 68th Republic Day on 26th January 2017. Flag hoisting ceremony performed by Hon'ble Vice-Chancellor. In this occasion, students participated in activities like song, plays, group dance etc.

## विश्वविद्यालये समाचरितः गणतन्त्रदिवसः





गणतन्त्रदिवसे भाषमाणाः कुलपतयः

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन भारतराष्ट्रस्य ६८तमः गणतन्त्रदिवसः जनवरीमासस्य २६ तमे दिनाङ्के विश्वविद्यालयप्राङ्गणे समाचरितः । कार्यक्रमेऽस्मिन् विश्वविद्यालयस्य कुलपतिः प्रो. अर्कनाथचौधरी, कार्यकारिकुलसचिवः डॉ. दशरथजादवः, अनुस्नातकभवनाध्यक्षः प्रो. विनोदकुमारझा, वेदविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या तथा विश्वविद्यालयस्य अन्ये प्राध्यापकाः, अधिकारिणः, कर्मचारिणः, छात्राश्च उपस्थिताः आसन् । कार्यक्रमस्यारम्भे कुलपतिना ध्वजवन्दनं



भारतध्वजाय सम्मानं यच्छन्तः विश्वविद्यालयकुटुम्बीयाः

विहितम् । तदनु सर्वैः जनैः राष्ट्रगानं गीतम् । एतस्मिन्नवसरे कुलपतिना स्वसन्देशे भणितं यत् अस्माकं देशस्य स्वातन्त्र्यन्तु हुतात्मनः बलिदानेन अवाप्तम्। परमस्य राष्ट्रस्य स्वातन्त्र्यरक्षणाय गणतन्त्रस्य आवश्यकता विद्यते । यदि राष्ट्रे प्रजातन्त्रात्मकं शासनं भवति तर्ह्येव राष्ट्रं चिरं यावत् सुस्थितं भवति । एतदर्शमेव अस्माकं राष्ट्रे प्रजातन्त्रात्मकशासनप्रणाली विद्यते, यस्याः कारणमस्ति अस्माकं संविधानम् । संविधानेऽस्मिन् जनानाम् अधिकारैः सह तेषां कर्तव्याणामपि उल्लेखः विद्यते । अतः सर्वैः स्वस्वकर्तव्यस्य पालनं करणीयम् । कार्यक्रमेऽस्मिन् छात्रैः विविधाः सांस्कृतिककार्यक्रमाः अपि प्रस्तुताः यत्र गीतं, नाटकं, प्रहसनं, समूहनृत्यमित्यादिकार्यक्रमाः प्रशंसार्हाः आसन् । एतस्य समग्रस्य कार्यक्रमस्य सुन्दरतया सञ्चालनं दर्शनसङ्कायाध्यक्षेण डॉ. जानकीशरण-आचार्येण डॉ. जयेशमुंगरामहोदयेन च कृतम् ।

# Cultural events on Independence Day in Campus (15/08/2017)

Every year the citizens of India celebrate the Independence Day of the Country. Shree Somnath Sanskrit University celebrated theIndependence Day on 15th August 2017. Flag hoisting ceremonywas performed byRespected Vice-Chancellor. Cultural Programmes were organized to awake the patriotic feelings in teachers and students. Motivational speech was also delivered by Respected Vice-Chancellor.


रमेशचन्द्रशुक्लमहोद

## स्वातन्त्र्यपर्व

प्रतिवर्षमिव अस्मिन्नपि वर्षे स्वातन्त्र्यपर्व श्रीसोमनाथसंस्कृतविश्वविद्यालये १५-०८-२०१७ तमे दिनाङ्के समाचरितम्। प्राचार्यस्य डॉ. नरेन्द्रपण्ड्या महोदयस्य संयोजकत्वे आयोजितेऽस्मिन् कार्यक्रमे कुलपतिभिः सह ध्वजवन्दनं विहितम्। कुलपतेः भाषणं जातं ध्वजवन्दनानन्तरं सांस्कृतिकः कार्यक्रम आयोजितः, यत्र देशभक्तिगीतं, छात्राणां प्रतिभाः, नाटकं, समूहगीतं, नृत्यम् इत्यादीनां विद्यार्थिभिः प्रस्तुतिः कृताः। कार्यक्रमे सर्वेऽपि अधिकारिणः छात्राश्च उपस्थाय राष्ट्रभक्तिं प्रदर्शितवन्तः। कार्यक्रमस्य व्यवस्थापनं सञ्चालनं च डॉ. जयेशमुंगरा महोदयः अकरोत्।





SOURCE – SOMJYOTI - ISSUE 16, PAGE NO-03

# Cultural events on Republic Day in  Campus (26/01/2018)

Every year on 26th January throughout India celebrate the Republic Day of the Country. Shree Somnath Sanskrit University celebrated the 69th Republic Day on 26th January 2018. Flag hoisting ceremony and Patriotic programmes were performed.





## नवषष्टितमः गणतन्त्रोत्सवः (69 th)

प्रतिवर्षमिव अस्मिन्नपि वर्षे श्रीसोमनाथ संस्कृतविश्वविद्यालये नवषष्टितमः गणतन्त्रदिवस आचरितः। अत्र विश्वविद्यालस्य कुलपतिभिः सह सर्वैः ध्वजवन्दनं विहितम्। ध्वजवन्दनान्तरं सांस्कृतिकः कार्यक्रमः आयोजितः, यत्र देशभक्तिगीतं, छात्राणां प्रतिभाः, नाटकं, समूहगीतं, नृत्यम्, इत्यादीनां विद्यार्थिभिः प्रस्तुतिः कृताः। कार्यक्रमे सर्वेऽपि अधिकारिणः छात्रः च उपस्थाय राष्ट्रभक्तिं प्रदर्शितवन्तः। कार्यक्रमस्य व्यवस्थापनं सञ्चालनं च डॉ. जयेशमुंगरा महोदयः अकरोत्।

SOURCE – SOMJYOTI -  ISSUE 16, PAGE NO-10









SOURCE – SOMJYOTI - ISSUE 16, PAGE NO-10

# Speech competition on International Mother Language Day (21-02-2018)

International Mother Language Day on 21st February 2018 was celebrated in Shree Somnath Sanskrit University. Students participated enthusiastically in speech competition in their Mother Tongue i.e. Hindi, Telugu, Bihari, Gujarati, Odia, Bhojpuri, Marathi, Marvadi, Kutchi etc. All the students enjoyed this programme and became familiar with different languages of India.



May 2017 - April 2018

## मातृभाषादिवसः

दिनाङ्क २१/०२/२०१८ को श्रीसोमनाथसंस्कृतविश्वविद्यालय द्वारा मातृदिन आयोजित किया गया। जिसके अध्यक्ष एवं संयोजकरूप मे विराजमान पुराण शास्त्रपारंगत डॉ. पंकज रावल महोदयजी थे। इस कार्यक्रम के संयोजक श्रीजयेश मुंगराजी भी थे। इस कार्यक्रम मे सभी छात्रो ने सहर्ष भागग्रहण किया, जिसमे भिन्न-भिन्न राज्य के छात्रोने अपनी-अपनी मातृभाषा मे भागग्रहण किया। यह कार्यक्रम बहुत ही उत्सवरूप से छात्रो के द्वारा मनाया गया।

इस कार्यक्रम में अनेक भाषामे भाषण-गीत-नृत्य-दुहा जिसमें गुजरात-गुजराती, बिहार-भोजपुरी, उडिशा-उडिया, राजस्थान-मारवाडी, कच्छ-कच्छि, महाराष्ट्र-मराठी इत्यादि भाषा में छात्रों ने भाग ग्रहण किया।

मातृदिवस का प्रारम्भ नाटक से होकर समूह नृत्य तक चला सभी छात्रोंने उत्साह के साथ भाग ग्रहण किया।

इस कार्यक्रम के संचालक शास्त्री द्वितीय वर्ष के छात्र कृष्णकुमार पाण्डेयजी थे।

SOURCE – SOMJYOTI - ISSUE 16, PAGE NO-11

# Cultural events on Independence Day in Campus (15/08/2018)

Every year on 15th August throughout India celebrate the Independence Day of the Country. On this auspicious occasion, Shree Somnath Sanskrit University celebrated the 72nd Independence Day on 5th August 2018. Flag hoisting ceremony, Patriotic programmes and Motivational speeches were performed by teachers and students.



## स्वातन्त्र्यदिवससमाचरणम्

स्वातन्त्र्यदिवसमुपलक्ष्य १५.०८.२०१८ तमे दिनाङ्के श्रीसोमनाथ-संस्कृतविश्वविद्यालयपरिसरे ७२तमं स्वातन्त्र्यपर्व समायोजि। अत्र तत्कालीनकार्यकारि-कुलपति: प्रो. महेन्द्रकुमारदवे ध्वजोत्तोलनम् अकार्षीत्। सन्दर्भेऽस्मिन् स: उपस्थितजनान् भारतदेशस्य अखण्डताया: संस्कृतेश्च रक्षणाय सम्भूय कार्यं कर्तव्यमिति संदेशं प्रादात्। दिवसेऽस्मिन् त्रिवेदि-हर्षल: शियाणी जयेश:, रादडिया रवि:, देवांशी भिण्डे, यशवन्तपण्ड्या इत्यादिभि: छात्रै: विभिन्ना: सांस्कृतिककार्यक्रमा: प्रस्तुता:। सन्दर्भेऽस्मिन् कार्यक्रम-मार्गदर्शक: डॉ. नरेन्द्रकुमार एल्. पण्ड्या, प्रो. देवेन्द्रनाथपाण्डेय अनुस्नातकविभागाध्यक्षा प्रो. अर्चनादुबे अन्ये च प्राध्यापका: अधिकारिण: कर्मचारिणश्च समुपस्थिता: आसन्। कार्यक्रमसञ्चालनं डॉ. जयेशमुंगरा अकरोत्।

परिसरे स्वातन्त्र्यपर्वणि ध्वजोत्तोलनस्य दृश्यम्

स्वातन्त्र्यदिने छात्रै: प्रस्तुतं नाटकमेकम्






SOURCE – SOMJYOTI - ISSUE 17-18, PAGE NO-04

# Cultural events on 150th Birth Anniversary of Mahatma Gandhi (02-10-2018)

On 2nd October 2018 Gandhi Jayanti was celebrated in University Campus. Mass procession was conducted by all students, teachers and working staff. With the Moto of "Our India Clean India" everyone participated in cleaning the University Campus. Everyone participated in singing "Raghupati Raghav Raja Ram", "Sabarmati ke Sant", "Vaishnav Jan to Tene Kahiye", etc.



May 2018 - December 2018 12 सोमज्योतिः

## महात्मनः गान्धिवर्यस्य १५० तमी जन्मजयन्ती

भारतसर्वकारस्य आदेशानुसारं श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे ०२.१०.२०१८ दिनाङ्के महात्मनः गान्धिवर्यस्य १५० जन्मजयन्त्युत्सवदिवसस्य समाचरणम् अभवत्। प्रातः सप्तवादनात् अष्टवादनं यावत् विश्वविद्यालयस्य आचार्याः अधिकारिणः कर्मचारिणः छात्राश्च विभिन्नसूत्रोच्चारणेन जयघोषेण च एकस्यां सामूहिकशोभायात्रायां समन्विताः अभूवन्। तदनु "अस्माकं भारतं स्वच्छं भारतम्" इति लक्ष्यम् उररीकृत्य स्वेच्छया सर्वे आचार्याः अधिकारिणः छात्राश्च विश्वविद्यालयपरिसरस्य स्वच्छतां समपादयन्। सन्दर्भेऽस्मिन् प्रो. अर्चनादुबे सर्वधर्मप्रार्थनां प्रास्तौत्। अथ डॉ. दीपेशकतिरा महात्मनः गान्धिवर्यस्य जीवनसम्बन्धिप्रसङ्गान् श्रावयित्वा तस्य जीवनं अहिंसा-सत्य-सत्याग्रहादिपालनविषये कथम् अस्मान् प्रेरयति इति विषये उपस्थितान् सर्वान् अबोधयत्। विश्वविद्यालयच्छात्रैः "रघुपति राघव राजा राम", "साबरमती के सन्त", "वैष्णव जन तो तेने कहिये" इत्यादिगीतानि अपि अगीयन्त। अस्मिन् कार्यक्रमे प्रो. देवेन्द्रनाथपाण्डेयः, प्राचार्यः डॉ. नरेन्द्रकुमार एल्. पण्ड्या, प्रो. महेन्द्रकुमार दवे, डॉ. उपकुलसचिवः डॉ. दशरथजादवः, परीक्षाधिकारी डॉ. योगेशपटेलः, डॉ. रमेशचन्द्रशुक्लादयः अध्यापकाः कर्मचारिणश्च समुपस्थिताः आसन्।

परिसरे स्वच्छताभियानरताः परिसरीयाः छात्राः

SOURCE – SOMJYOTI - ISSUE 16, PAGE NO-12




श्रीसोमनाथसंस्कृतयुनिवर्सिटी
वेरावलम्
श्री-सोमनाथ-संस्कृत-युनिवर्सिटी
सोमनाथ-वेरावल
150
श्री सोमनाथ संस्कृत युनिवर्सिटी-वेरावळ
महात्मा गांधीजीनी १५०मी जन्म जयंति उजवणी अंतर्गत
प्रभात फेरी, सर्वधर्म प्रार्थना, स्वच्छता अभियान अने ओनलाइन क्वीझ




श्रीसोमनाथसंस्कृतयुनिवर्सिटी
वेरावलम्
150
શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી-વેરાવળ
મહાત્મા ગાંધીજીની ૧૫૦મી જન્મ જયંતિ ઉજવણી અંતર્ગત
પ્રભાત ફેરી, સર્વધર્મ પ્રાર્થના, સ્વચ્છતા અભિયાન અને ઓનલાઈન
श्री-सोमनाथ-संस्कृत-युनिवर्सिटी









# Cultural events on Republic Day in Campus (26-01-2019)

Shree Somnath Sanskrit University celebrated the 70th Republic Day on 26th January 2019. Flag hoisting ceremony performed by Hon'ble Vice-Chancellor, Prof. Gopabandhu Mishra. In this occasion, all teaching and non-teaching staff and students paid tribue to the soldiers by performing many activities like singing, dancing etc.

## सर्वैभवं समाचरितं ७०तमं गणतन्त्रपर्व



विश्वविद्यालयपरिसरे गणतन्त्रदिवसस्य किञ्चन दृश्यम्

भारतस्य गणतन्त्रं भारतस्य आत्मा वर्तते। अतः प्रतिवर्षमिव अस्मिन्नपि संवत्सरे श्रीसोमनाथसंस्कृतविश्वविद्यालये गणतन्त्रदिवसस्य आचरणं विश्वविद्यालयपरिसरे सोत्साहं समाचरितम्। अस्मिन् कार्यक्रमे अध्यक्षरूपेण मान्याः कुलपतयः उपस्थिताः भूत्वा ध्वजोत्तोलनमकार्षुः।

अत्रावसरे कार्यकारि-कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागस्य अध्यक्षा प्रो. अर्चनादुबे, प्रो. देवेन्द्रनाथपाण्डेयः, वेरावलजनपदस्य भारतीयजनतादलस्य उपप्रमुखः डॉ. जयेशभाई वघासिया, वेरावलनगर-वैद्यसङ्घस्य प्रमुखः डॉ. सञ्जयभाई परमारः, विश्वविद्यालयस्य सर्वेऽपि आचार्याः, उपाचार्याः, सहायकाचार्याः, अधिकारिणः, कर्मचारिणः, छात्राश्च उपस्थिताः आसन्। कार्यक्रमस्य आरम्भः ध्वजोत्तोलनेन सह सम्भूय राष्ट्रगानेन अभूत्। तदनु अध्यक्षत्वेन वदता श्रीमता कुलपतिना अभाणि यत् अस्माकं पूर्वजैः हुतात्मभिः अस्य देशस्य स्वतन्त्रता तु प्राप्ता परम् इदम् अस्माकं दायित्वं वर्तते यत् इदं राष्ट्रं वास्तविकरीत्या सुराष्ट्रं भवेत् तदर्थं सर्वैः नागरिकैः स्वकर्तव्यानि सुचारुतया अवश्यं पालनीयानि। ...नीयकुलपतेः उद्बोधनानन्तरं छात्रैः भाषण-गीत-नाटक-योगाभ्यासादिकार्यक्रमाः समायोजिताः आसन्। अस्मिन् गणतन्त्रपर्वसमाचरणे एकमेतदपि वैशिष्ट्यमासीत् यत् कार्यक्रमान्ते विश्वविद्यालयस्य सर्वैः छात्राध्यापकाधिकारिकर्मचारिभिः पुष्पाञ्जलिसमर्पणपुरस्सरं भारतमातुः समर्चनम् अकारि। अस्य समग्रकार्यक्रमस्य सञ्चालनम् अनुस्नातकाध्यक्षायाः प्रो. अर्चनादुबेमहोदयायाः निर्देशने डॉ. जयेशमुंगरा अकरोत्।


प्रभासज्योतिः
शैक्षणिकं भवनम्
विश्वविद्यालयपरिसरे उपस्थिताः प्राध्यापकाः छात्राः कर्मचारिणश्च
छात्रैः प्रदर्शितस्य सांस्कृतिककार्यक्रमस्य किञ्चन दृश्यम्
भारतमातुः पूजनम्


प्रभासज्योतिः
शैक्षणिकं भवनम्
KEEP CLEAN







SOURCE – SOMJYOTI - ISSUE 17-18, PAGE NO-06

# Cultural events on Independence Day in Campus (15/08/2019)

73rd Independence Day was celebrated in Shree Somnath Sanskrit UniversityOn 15th August 2019 The Hon'ble Vice-Chancellor hoisted the Flag and later everyone performed the National Anthem.Hon'ble Prime Minister Shri Narendra Modi removed Article 370 and 35A from Jammu and Kashmir With the aim of "One Nation One Constitution", was praised by Hon'ble Vice-Chancellor, Prof. Gopabandhu Mishra.



अप्रैल-सितम्बर २०१९ 06 सोमज्योतिः (संयुक्ताङ्कः - २०-२१)

## ७३ तमं स्वातन्त्र्यपर्व समाचरितं श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे

प्रतिवर्षमिव ऐषमः श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १५ ऑगस्त २०१९ दिनाङ्के स्वतन्त्रतादिवसस्य भव्यतया आयोजनम् अक्रियत। विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः ध्वजोत्तोलनम् अकरोत् तदनु सर्वैः मिलित्वा राष्ट्रगानमगीयत। प्रसङ्गेऽस्मिन् स्वीयोद्बोधने प्रो. गोपबन्धुमिश्रवर्यः अवादीत् यत् अस्मिन् वर्षे स्वातन्त्र्यपर्वणः एतद्वैषिष्ट्यमस्ति यत् अस्माकं राष्ट्रं भारतस्य अखण्डताविषये एकीभूय समागतमस्ति। भारतस्य अखण्डतारक्षणे "एकं राष्ट्रम् एकं संविधानम्" इति लक्ष्यमुररीकृत्य जम्मूकाश्मीरराज्यात् धारा ३७० किञ्च ३५A इत्यस्य अपसारणार्थं माननीयप्रधानमन्त्रिणः श्रीनरेन्द्रमोदिवर्यस्य सर्वकारः भूयो भूयः अभिनन्द्यते। अस्माकं पूर्वजैः हुतात्मभिश्च भारतस्य स्वातन्त्र्यं तु अवाप्तम्, परमिदानीम् एतस्य स्वातन्त्र्यस्य रक्षणस्य दायित्वम् अस्माकं वर्तते। अस्माभिः स्वकर्तव्यपालनपूर्वकं राष्ट्रभक्तिः प्रदर्शनीया। इयं राष्ट्रभक्तिः अस्माभिः अनुशासनपालनेन, स्वकर्तव्यपालनेन, जलसञ्चयेन, विद्युत्संरक्षणेन इत्यादिभिः नानाभिः उपायैः कर्तुं शक्यते।

स्वातन्त्र्यपर्वणि उद्बोधनं विदधानः कुलपतिः प्रो. गोपबन्धुमिश्रः

कार्यक्रमे उपस्थिताः अध्यापकाः छात्राश्च

अस्मिन् स्वातन्त्र्यदिवससमाचरणकार्यक्रमे विश्वविद्यालयस्य छात्रैः देशभक्तिगीतानि, देशभक्तिभाषणानि, देशभक्तिकाव्यानि च मनोहारिरीत्या प्रस्तुतानि। अस्मिन् कार्यक्रमे कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनाकुमारीदुबे, प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, वेदविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, अन्ये सहायकाचार्याः, शिक्षणेतराधिकारिणः कर्मचारिणः, छात्राश्च समुपातिष्ठन्। अस्य कार्यक्रमस्य मार्गदर्शनं डॉ. नरेन्द्रकुमारपण्ड्या किञ्च मञ्चसञ्चालनं डॉ जयेशमुङ्गरा अकरोत्।

७३तमस्य स्वातन्त्र्यपर्वणः किञ्चन दृश्यम्

SOURCE – SOMJYOTI - ISSUE 17-18, PAGE NO-07

# Cultural events on  Republic Day in Campus

# (26-01-2020)

Shree Somnath Sanskrit University celebrated the Republic Day on 26th January 2020. Flag hoisting ceremony performed by Hon'ble Vice-Chancellor. Pyramid gymnastic demonstration was done by Dr. Jayesh Mungara.



## गणतन्त्रदिवसस्य समाचरणम्

२६.०१.२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे भारतदेशस्य गणतन्त्रदिवसस्य समाचरणं सवैभवं कृतमासीत्। प्रातः ८.३० वादने समायोजिते अस्मिन् गणतन्त्रदिवससमारोहे विश्वविद्यालयस्य माननीयकुलपतिना प्रो. गोपबन्धुमिश्रेण ध्वजारोहणं कृतम्। तदनु सर्वैः मिलित्वा राष्ट्रगानं गीतम्। अस्मिन् अवसरे कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनादुबे, वेदसङ्कायाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या, अन्ये च प्राध्यापकाः कर्मचारिणः छात्राश्च उपस्थिताः आसन्। कुलपतिः प्रो. गोपबन्धुमिश्रः सन्दर्भेऽस्मिन् प्रसङ्गोचितम् उद्बोधनमपि अकरोत्। महोदयेन उक्तं यत् प्रजासु स्वाधिकारेण सह स्वकर्तव्यस्यापि भावना राष्ट्रभक्तिः वर्तते। अस्माभिः सर्वदा राष्ट्रहिताय चिन्तनीयम्। अत्रावसरे विभिन्नैः छात्रैः राष्ट्रविषये भाषणानि अदीयन्त, राष्ट्रभक्तिभावभरितानि गीतानि च अगीयन्त। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्राः अस्मिन्नवसरे लयबद्धं योगासनं, व्यायामञ्च प्रादर्शयन्। अस्य गणतन्त्रदिवससमारोहस्य संयोजनं शारीरिकशिक्षकः डॉ. जयेशमुङ्गरा अकरोत्।



Source-somjyoti -  issue -22-page number -05


शैक्षणिकं भवनम्


प्रभातज्योतिः
शैक्षणिकं भवनम्


प्रभासज्योतिः
शैक्षणिकं भवनम्

